## पूगेष्वन्यतरस्याम्। (२८/३७६२)

पूगा गणाः, तद्वाचिनि उत्तरपदे कर्मधारये समासे कुमारस्यान्यतरस्यामादिरुदात्तो भवति। कुमारचातकाः, कुमारचातकाः, कुमारचातकाः। कुमारलोहध्वजाः, [1]कुमारलोहध्वजाः, कुमारलोहध्वजाः। कुमारबलाहकाः, कुमारबलाहकाः, कुमारबलाहकाः। कुमारजीमूताः, कुमारजीमूताः, कुमारजीमूताः।

चातकादयः पूगशब्दाः, तेभ्यः 'पूगाञ्ञ्योऽग्रामणीपूर्वात्' (५.३.११२/२०६६) इति ञ्यः प्रत्ययः, तस्य 'तद्राजस्य बहुषु तेनैवास्त्रियाम्' (२.४.६२/११९३) इति लुक्। [2]अत्र यदा आद्युदात्तत्वं न भवति तदा 'कुमारश्च' (६.२.२६/३७६०) इति पूर्वपदप्रकृतिस्वरत्वमेके कुर्वन्ति। ये तु तत्र प्रतिपदोक्तस्य ग्रहणमिच्छन्ति तेषां समासान्तोदात्तत्वमेव भवति॥

## इगन्तकालकपालभगालशरावेषु द्विगौ। (२९/३७६३)

इगन्ते उत्तरपदे, कालवाचिनि, कपाल भगाल शराव इत्येतेषु च द्विगौ समासे पूर्वपदं प्रकृतिस्वरं भवति। इगन्त – पञ्चारत्निः। दशारत्निः। [3]पञ्चारत्नयः प्रमाणमस्य, दशारत्नयः प्रमाणमस्य इति[4] तद्धितार्थे द्विगुः, 'प्रमाणे [5]लः' (वा.५५८) 'द्विगोर्नित्यम्' (वा.५५९) इति मात्रचो लोपः। इगन्त।

काल – पञ्चमास्यः। दशमास्यः। पञ्च मासान् भृतो [6]भूतो भावी वा (५.१.८०/१७४४) इति तद्धितार्थे 'द्विगोर्यप्' (५.१.८२/१७४६)। पञ्चवर्षः। दशवर्षः। 'वर्षाल्लुक् च' (५.१.८८/१७५३) इति [7]ठञो लुक्। काल।

कपाल – पञ्चकपालः। दशकपालः। कपाल। भगाल – पञ्चभगालः। दशभगालः। भगाल। शराव – पञ्चशरावः। दशशरावः। 'संस्कृतं भक्षाः' (४.२.१६/१२१७) [8]इति तद्धितार्थे एते समासाः 'द्विगोर्लुगनपत्ये' (४.१.८८/१०८०) इति कृताण्प्रत्ययलोपा द्रष्टव्याः। इगन्तादिषु इति किम्? पञ्चभिरश्वैः क्रीतः पञ्चाश्वः। दशाश्वः। द्विगौ इति किम्? परमारत्निः। [9]परमशरावम्। पञ्चारत्न्यो दशारत्न्यः इति च यण्गुणयोः बहिरङ्गलक्षणयोरसिद्धत्वात् स्थानिवद्भावाद् वा द्विगुस्वर[10] इगन्तलक्षणः प्रवर्तते॥

## बह्वन्यतरस्याम्। (३०/३७६४)

बहुशब्दः पूर्वपदमिगन्तादिषूत्तरपदेषु द्विगौ समासेऽन्यतरस्यां प्रकृतिस्वरं भवति। पूर्वेण [11]नित्यं प्राप्ते विकल्पः। बह्वरत्निः, बह्वरत्निः। [12]बहुमास्यः, बहुमास्यः। बहुकपालः, बहुकपालः। बहुभगालः, बहुभगालः। बहुशरावः, बहुशरावः। बहुशब्दोऽन्तोदात्तः, तस्य प्रकृतिस्वरे कृते यत्र यणादेशः तत्र 'उदात्तस्वरितयोर्यणः स्वरितोऽनुदात्तस्य' (८.२.४/३६५७) इत्येष स्वरो भवति॥

## दिष्टिवितस्त्योश्च। (३१/३७६५)

दिष्टि वितस्ति इत्येतयोरुत्तरपदयोः द्विगौ समासे पूर्वपदमन्यतरस्यां प्रकृतिस्वरं भवति[13]। पञ्चदिष्टिः, पञ्चदिष्टिः। पञ्चवितस्तिः, पञ्चवितस्तिः। दिष्टिवितस्ती प्रमाणे, तेनात्र मात्रचो [14]लुक्॥

---

1. कुमारलोहकाः ग. फ. 2. अत्र नास्ति क. फ. 3. पञ्च आरत्नयः क. 4. विगृह्य इत्यधिकम् फ. 5. लः नास्ति क. 6. भूतो नास्ति क. फ. ह. 7. ठको ड. 8. इत्यत्र ग. 9. परमशरावः ह. 10. इगन्तलक्षणं क. 11. नित्ये क. ह. 12. बहुमास्यः नास्ति फ. 13. इगन्तत्वात् नित्ये प्राप्ते विकल्प इष्यते इत्यधिकम् फ. 14. लोपः ब.